अथ शूद्रधर्म्मादि "विप्राणामर्च्चनं नित्यं शूद्रधर्म्मो विधीयते । तद्द्वेषी तद्धनग्राही शूद्रश्चाण्डालतां व्रजेत् । ततः कोटिसहस्राणि शतजन्मानि शूकरः । श्वापदः शतजन्मानि शूद्रो विप्रधनापहा ॥ यः शूद्रो ब्राह्मणीगामी मातृगामी स पातकी । कुम्भीपाके पच्यते स यावद्वै ब्रह्मणः शतम् । कुम्भीपाके तप्ततैले दष्टः सर्पैरहर्निशम् । शब्दञ्च विकृताकारं कुरुते यमताडनात् । ततश्चाण्डालयोनिः स्यात् सप्तजन्मसु पातकी । सप्तजन्मसु सर्पश्च जलौकाः सप्तजन्मसु । जन्मकोटिसहस्रञ्च विष्ठायां जायते कृमिः । योनिक्रिमिः पुंश्चलीनां स भवेत् सप्तजन्मसु । गवां व्रणकृमिः स्याच्च पातकी सप्तजन्मसु । योनौ योनौ भ्रमत्येवं न पुनर्जायते नरः" ब्रह्मवै० पु० ८३ अ० । "द्विजानां पादशुश्रूषा शूद्रैः कार्य्या सदा त्विह । पादप्रक्षालनं गन्धैर्भोज्यमुच्छिष्टमात्रकम् । ते तु चक्रुस्तदा चैव तेभ्यो भूयः पितामहः । शुश्रूषार्थं मया सृष्टं तुरीये तु पदे कृताः । द्विजानां चात्रधर्म्माणां वैश्यानाञ्च भवद्विधाः । त्रिभ्यः शुश्रूषणा कार्य्या इत्यवादीद्विचक्षणः" पाद्मे सृ०ख० १६ अ० । "शुश्रूषैव द्विजातीनां शूद्राणां धर्म्मसाधनम् । कारुकर्म्म तथाऽऽजीवः पाकयज्ञोऽपि धर्म्मतः" मार्कण्डे ४८ अ० । "तथा मद्यस्य पानेन ब्राह्मणीगमनेन च । वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत्" इति शूद्रकमलाकरधृतपराशरवाक्यम् । ब्राह्मणस्य तदन्नभोजननिषेधो यथा "शूद्रान्नं ब्राह्मणोऽश्नन् वै मासं मासार्द्धमेव वा । तद्योनावभिजायेत सत्यमेतद्विदुर्बुधाः । अधोदरस्थशूद्रान्नो मृतः श्वा चैव जायते । द्वादश दश चाष्टौ च गृध्रशूकरपुष्कराः । उदरस्थितशूद्रान्नो ह्यधीयानोऽपि नित्यशः । जुह्वन् वापि जपन् वापि गतिमूर्द्ध्वां न विन्दति । अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम् । वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम् । तस्मात् शूद्रं न भिक्षेयुर्यज्ञार्थं सद्द्विजातयः । श्मशानमिव सच्छूद्रस्तस्मात्तं परिवर्जयेत् । कणानामथ वा भिक्षां कुर्य्याज्ज्ञातिविवर्ज्जितः । सच्छूद्राणां गृहे कुर्व्वन् तत्पापेन न लिप्यते । विशुद्धान्वयसञ्जातो निवृत्तो मद्यमांसतः । द्विजभक्तो वणिग्वृत्तिः शूद्रः सन् परिकीर्त्तितः" वृहत्पराशरः । शूद्रकृत्यविचारणतत्त्वे मत्स्यपुराणम्

"एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धन्तु सर्व्वदा । नमस्कारेण मन्त्रेण कुर्य्यादामान्नवद्बुधः । दानप्रधानः शूद्रः स्यादित्याह भगवान् प्रभुः । दानेन सर्व्वकामाप्तिरस्य सञ्जायते यतः" । ततो दानमेवापेक्षितं न तु भोजनमपि । सामान्यं सर्व्वजनकर्त्तव्यत्वेन प्रतिमासकृष्णपक्षादिविहितश्राद्धम् आभ्युदयिकश्राद्धञ्च एवं द्विजातिवत् शूद्रोऽपि कुर्य्यादित्यन्वयः । नमस्कारेण मन्त्रेण न तु पठितमन्त्रेण । आमान्नवदित्यनेन जलसेकसिद्धान्नव्यावृत्तिः "स्विन्नमन्नमुदाहृतम्" इति वशिष्ठेन स्विन्नस्यैवान्नत्वाभिधानात् कन्दुपक्वस्य भृष्टत्वं न तु स्विन्नत्वं हारीतेन स्वेदनभर्जनयोः पृथक्त्वमुक्तं यथा "आदीपनतापनस्वेदनभर्जनपचनादिभिः पञ्चमीति" । अस्यार्थः आदीपनं काष्ठानां, तापनं तोयादेः, स्वेदनं धान्यादेर्भर्जनं यवादेः, पचनं तण्डुलादेः इति पञ्चमी सूना इति कल्पतरुः । अतएव स्विन्नधान्येन व्यवह्रियते । "कन्दुपक्वानि तैलेन पायसं दधिसक्तवः । द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि" इति कूर्म्मपुराणवचने शूद्रकर्त्तृक कन्दुपक्वादेर्ब्राह्मणभक्ष्यत्वेन श्राद्धे देयत्वमुक्तम् । कन्दुपक्वं जलोपसेकं विना केवलपात्रेण यदग्निना पक्वम् । पायसं पाकेन काठिन्यविकारापन्नं दुग्धं परमान्नपरत्वे पुंलिङ्गनिर्द्देशापत्तेः तथा चामरः "परमान्नन्तु पायसः" इति । "दिने त्रयोदशे प्राप्ते पायसेन भोजयेद्द्विजान् । अयं विधिः प्रयोक्तव्यः शूद्राणां मन्त्रवर्जितः" इति श्राद्धचिन्तामणिधृतवराहपुराणवचनमपि कन्दुपक्वपरम् एवन्तु एतद्वचनं सच्छूद्रपरं मैथिलोक्तं हेयम् । एवम् आममांसस्यापि श्राद्धे देयत्वं सामगश्राद्धतत्त्वेऽनुसन्धेयम् । तत्र द्रव्यदेवताप्रकाशार्थं ब्राह्मणेन मन्त्राः पाठ्याः "अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः । अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते" इति वराहपुराणात् अयं श्राद्धेतिकर्त्तव्यताको विधिः शूद्रकर्त्तृकमन्त्रपाठरहितः शूद्रस्य मन्त्रपाठानधिकारसिद्धौ यदमन्त्रस्येति पुनर्वचनं तत्स्त्रियाः ग्रहणार्थं परिभाषार्थञ्च ततश्च तत्कर्म्मसम्बन्धिमन्त्रेण विप्रस्तदीयकर्म्मकारयितृब्राह्मणो गृह्यते तेन ब्राह्मणेन तत्र मन्त्रः पठनीय इति तात्पर्य्यं तत्र यजुर्व्वेदिका मन्त्राः तथा च स्मृतिः "आपक्रमेण सर्व्वत्र शूद्रा वाजसनेयिनः । तस्माच्छूद्रः स्वयं कर्म्म यजुर्व्वेदेन कारयेत्" । आपक्रमेण श्रुत्युक्तक्रमेण यजुर्व्वेदसम्बन्धिगृह्यादिना "चतुर्णामपि वर्णानां यानि प्रोक्तानि वेधसा । धर्म्मशास्त्राणि राजेन्द्र ! शृणु तानि नृपोत्तम ! । विशेषतस्तु शूद्राणां पावनानि मनीषिभिः ।